CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Rack-17
Shelf-4.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ श्रीः ॥

काशी संस्कृत ग्रन्थमाला

१७५

कात्यायनाचार्य-प्रणीतं

शुक्लयजुःप्रातिशाख्यम्

अथवा

वाजसनेयि-प्रातिशाख्यम्

तच्चैतत्

श्रीमती इन्दु रस्तोगी, एम० ए०,

इत्येतया प्राचीनहस्तलिखितपुस्तकानामाधारेण पर्यालोचनपुरःसरं संपादितम्, इदम्प्रथमेन आङ्गल-भाषानुवादेन च समलंकृतम्

प्राक्कथन—लेखकः

विद्यामार्तण्डो

डाक्टर मङ्गलदेव शास्त्री

वाराणसेय-संस्कृत-विश्वविद्यालयस्य पूर्वोपकुलपतिः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

१९६७

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

मुद्रक : विद्याविलास प्रेस, वाराणसी-१

संस्करण : प्रथम, वि० संवत् २०२४

मूल्य : १०-००

© The Chowkhamba Sanskrit Series Office,

Gopal Mandir Lane,

P. O. Chowkhamba, Post Box 8,

Varanasi-1 (India)

1967

Phone : 3145

3731
17-7-68
State Museum, Library, Lko.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

THE

KASHI SANSKRIT SERIES

179

*****

THE

S'UKLAYAJUḤ-PRĀTIS'ĀKHYA

OF

KĀTYĀYANA

Critically edited from original manuscripts

with

English translation of the text

By

SHRIMATI INDU RASTOGI, M. A.

With a Foreword

By

Dr. MANGAL DEVA SHASTRI,

M. A., D. Phil. (Oxon.)

Ex-Vice-Chancellor,

Sanskrit University, Varanasi.

THE

CHOWKHAMBA SANSKRIT SERIES OFFICE

VARANASI-1

1967

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

First Edition
1967
Price Rs. 10-00

Also can be had of
THE CHOWKHAMBA VIDYABHAWAN
Post Box No. 69,
Chowk, Varanasi-1 (India)
Phone : 3076

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

FOREWORD

I am happy that the critical edition of the Śukla-Yajuḥ-Prātiśākhya (or the Vājasaneyi-Prātiśākhya), together with its first English Translation, which was lying with Mrs. Indu Rastogi, my daughter, for so long, is about to be published soon. It was on my own advice that in 1955 she undertook this important work. She worked on the subject for about two years under the guidance and supervision of both myself and Dr. Surya Kant, the then Head of the Sanskrit Department, Banaras Hindu University. The idea was to extend the work in course of time so as to cover a critical edition of the Commentary of Uvaṭa on the same Prātiśākhya. It is at my suggestion that she has decided to publish the present work. I hope the critical edition of Uvaṭa's Commentary on this Prātiśākhya will also be published as early as possible.

The importance of the Śukla-Yajuḥ-Prātiśākhya need not be emphasised here. It is as important for the textual study of the Vājasaneyi-Yajurveda-Saṁhitā as the Ṛgveda-Prātiśākhya is for the same sort of study of the Ṛgveda-Saṁhitā. Besides, its detailed treatment of the Pada-text is an additional point in its favour. It is for such reasons that the author of the Prātiśākhya, while concluding the treatise, rather proudly asserts "इत्याह स्वरसंस्कार-प्रतिष्ठापयिता भगवान् कात्यायनः" *(VIII. 68). Mrs. Rastogi has taken every care in preparing the present edition along with the first English translation of the Sūtras. I am sure the work will be well received by the learned pubilc, especially by those interested in the Prātiśākhya literature.*

Prachya Anusandhana Parishad,
Englishia Line,
Varanasi–2,
1–7–1967.

Mangal Deva Shastri

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

PREFACE

I am glad to bring before the learned public this critical edition of the Śukla-Yajuḥ-(or Vājasaneyi-) Prātiśākhya of Kātyāyana, together with its first English Translation. It was lying with me ever since 1957 when I completed it as a part of a more comprehensive work as a research scholar of the Banaras Hindu University. I am deeply indebted to Dr. Surya Kant, the then Head of the Sanskrit Department, Banaras Hindu University, and Dr. Mangal Deva Shastri, my father, for the valuable guidance and supervision I received from them. The present work is being published at the suggestion of my father, which, I have no doubt, will be welcomed by scholars. The detailed introduction to the work has been kept in abeyance till the whole work comprising the critical edition of Uvaṭa's Commentary on the Prātiśākhya is completed, as the introduction will necessarily have to deal with the topics concerned with that Commentary also. I hope it will not be long before that commentary is published together with the detailed introduction and additional notes etc.

This edition of the Vājasaneyi-Prātiśākhya is based on three Text MSS., named here as S^1, S^2, S^3 respectively, and two Commentary MSS., named as B^1 and B^2. All these MSS. belong to the Manuscript Section (Sarasvatī Bhavana) of the Varanaseya Sanskrit Vishva-Vidyalaya Library, Varanasi. A brief description of the MSS. (all on paper) is as follows :—

S^1. It represents MS. No. 2125 of the Sarasvati Bhavana Library. Called कातीयप्रातिशाख्य, the MS. contains folios : 1–13. Size : 9″ × 3. 9.″ Lines per pages : 9. Letters per line : about 38, Hand-writing : fair Deva-nāgarī script. Date : not given. By appearance the MS. may be about 200 years old, with marginal corrections in a later hand. It is complete and represents a fairly correct text of the Prātiśākhya.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

It begins :—श्रीगणेशाय नमः। जपादौ नाधिकारोस्ति सम्यक्पाठमजानतः। प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये। स्वरसंस्कारयोश्छंदसि नियमः etc.

It ends :—इति प्रातिशाख्ये कातीये अष्टमोध्यायः समाप्त ॥ श्री ॥ श्री.

The colophons of the MS. are generally like :—इति प्रातिशाख्ये प्रथमोध्यायः.

On the front page it is called : कातीयप्रातिशाख्य.

S². It represents MS. No. 2137 of the Sarasvati Bhavana Library. It contains folios :—1–23. Size : 8. 6″×3. 9.″ Lines per page : 7. Letters per line : about 29. Script : Devanāgari. Date : Saṁvat 1823. It is complete.

It begins (fol. 1b) :—श्रीगणेशाय नमः। जपादौ नाधिकारोस्ति सम्यक्पाठमजानतः। प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये ॥ स्वरसंस्कारयोश्छंदसि नियमः।

It ends (fol. 23a) :—इति श्रीकात्यायनप्रातिशाख्यसूत्रे अष्टमोध्यायः समाप्तः। संवत् १८२३ वर्षे चैत्रकृष्ण ३० रवौ दिने या(ज्ञिक)देवकृष्णसूनुना करुणाकृष्णेन लिखितं शुभं ॥ श्रीः ॥

The Colophons are generally like : इति कात्यायन-प्रातिशाख्यसूत्रे प्रथमोध्यायः।

On the front-page is written :—याज्ञिकदेवकृष्णस्येदं प्रातिशाख्य ॥ सूत्रं पुस्तकं पत्राणि त्रयोविंशतिः। पुस्तकमेतत् रामचन्द्रपाठकीयम्।

On the back-page is written : याज्ञिकदेवकृष्णस्येदं प० २३

S³. It represents MS. No. 2149 of the Sarasvati Bhavana Library. It contains folios : 1–17. Size : 9. 1″×4. 2.″ Lines per page : 9. Letters per line : about 32 (ranging from 26 to 35). Handwriting : good. Script : Devanāgarī. Date : not given, but may be about 150 years old. Generally gives a correct text of the Prātiśākhya.

It begins :—श्रीगणेशाय नमः। श्री सरस्वत्यै नमः। श्रीगुरुभ्यो नमः। ॐ नमः सिद्धम् ॥ जपादौ नाधिकारोस्ति सम्यक्पाठमजानतः ॥ प्रातिशाख्यमतोज्ञेयं सम्यक्पाठस्य सिद्धये ॥ १ ॥ स्वरसंस्कारयोश्छंदसि नियमः etc.

It ends :—इति कात्यायनकृते प्रातिशाख्यसूत्रे अष्टमोध्यायः ॥ ९ ॥ श्रीभीमचंड्यै नमो भूयादजस्रम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

The colophons of the MS. are generally like :—इति प्रातिशाख्यसूत्रे प्रथमोध्यायः ।.

B[1]. It represents MS. No. 47242 of the Sarasvati Bhavana Library. It contains folios : 1–126. Size : 9.6″ × 3.3.″ Lines per page : 7. Letters per line : about 31. Handwriting : fair Devanāgarī script. Date : not given, but by appearance about 200 years old.

It begins :—ओं श्रीसन्महागणपतये नमः । अथ प्रातिशाख्ये भाष्यं लिख्यते जपादौ etc.

It ends on Fol. 126b :—इत्यानन्दपुरवास्तव्यभट्टवज्रट्टसूनुना । उवटेन कृतं भाष्यं प्रातिशाख्यस्य निर्मलं ॥ इति श्रीमातृमोदाख्ये प्रातिशाख्यभाष्ये अष्टमोध्यायः समाप्त । श्रीरामो जयति । शुभं भवतु । हे पुस्तक नारायणभट्ट अंढेकराचे असे ।

B[2]. It represents MS. No. 47247 of the Sarasvati Bhavana Library. It contains folios : 1, 3–106, 108–109. Size : 9.8″ × 3.7.″ Lines per page : about 10. Letters per line : about 30. Handwriting : indifferent old Devanāgarī script.

It begins :—ओं नमः । श्रीः विघ्नहर्त्रे यजुर्वेदाय सवित्रे नमः । ओं प्रणम्य परमात्मानं व्याख्यास्ये प्रातिशाख्यकम् । सरस्वतीं च जगतस्तमोनाशनदीपिकां ॥ जपादौ नाधिकारोस्ति सम्यक्पाठमजानतः । प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये ॥ स्वरसंस्कारयोश्छंदसि etc.

It ends (on fol. 109b) :—इत्यानंदपुरवास्तव्यवज्रटसूनुऊअटकृते प्रातिशाख्यभाष्येष्टमोध्यायः ॥ ८ ॥ आनन्दपुरवास्तव्यवजटाख्यस्य सूनुना । ऊअटेन कृतं भाष्यं प्रातिशाख्यस्य निर्मलं ॥ १ ॥ इति श्रीप्रातिशाख्यभाष्यं संपूर्णं ॥ समाप्तं ॥ वाल्मीकिज्ञातीयेन शिवाख्येन लिखितमिदं भट्टमहीदासपठनार्थं । शुभं । श्रीनृसिंहो जयतात् । स्वस्ति संवत चन्द्रशमरसभूमिहायने आश्विनाद्यदल-विष्णुवासरे विश्वनाथपुरि भूमिकिंकरः । प्रातिशाख्यविवृतिं व्यलीलिखत् ।

It shows that the date of the MS. is संवत् 1631.

In addition to the above evidence, I have also taken into account the Text edited by Professor A. Weber, with German translation, in 1857, in the Indische Studien, Vol. IV, the Banaras edition of 1883–88 by Pandita Jugala Kiśora Śarmā and the Calcutta edition of 1893 by Pandita Jīvānanda Vidyāsāgara. They are respectively named in the foot-notes as W, B

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

and K. The last two, though in no sense critical editions, also contain Uvaṭa's Commentary on the Prātiśākhya. The Banaras edition here and there in the foot-notes refers to four MSS. called respectively क, ख, ग and घ, but does nos care to give any details regarding the same. The Calcutta edition is really a copy of the Banaras edition and practically does not carry any independent value.

As regards the English translation, every care has been taken to give a clear and accurate version of the Sūtras. Being the first English translation of the text, it need not be stated, it has got its own importance.

Shrimati Indu Rastogi,
C/o Shri R. C. Rastogi,
M. A., Sahityacharya, P. C.S.,
District Planning Officer,
Pilibhit. U. P.
1-6-1967.

Shrimati Indu Rastogi.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CORRECTIONS

शुक्लयजुःप्रातिशाख्यम्

(Sanskrit Text)

Page	Line	Incorrect	Correct
५	१७	एव-	एक-
९	१५	पत्तो-	पत्ती-
१५	१८	B^1 B^1	B^1 B^2
१८	१४	विश्वपती	विश्पती-
२०	२५	B K	B
३०	४	पृङ्ङ्क्त	पृङ्ह्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ शुक्लयजुःप्रातिशाख्यम्

प्रथमोऽध्यायः

स्वरसंस्कारयोश्छन्दसि नियमः[1] ॥ १ ॥ लौकिकानामर्थपूर्वकत्वात् ॥ २ ॥ न समत्वात् ॥ ३ ॥ स्याद्वाम्नायधर्मित्वाच्छन्दसि नियमः[2] ॥ ४ ॥ यत्तन्न ॥ ५ ॥ वायुः खात् ॥ ६ ॥ शब्दस्तत् ॥७॥ सङ्करोप[3] ॥८॥ स सङ्घातादीन् वाक् ॥ ९ ॥ त्रीणि स्थानानि ॥ १० ॥ द्वे करणे ॥ ११ ॥ शरीरात् ॥ १२॥ शरीरम् ॥ १३ ॥ शरीरे ॥ १४ ॥ तेषां समूहात् स उदयँस्त्रैकाल्यम् ॥ १५ ॥ ओंकारः स्वाध्यायादौ[4] ॥ १६ ॥ ओंकाराथकारौ ॥ १७ ॥ ओंकारं वेदेषु ॥ १८ ॥ अथकारं भाष्येषु ॥ १९ ॥ प्रयतः ॥ २० ॥ १ ॥

शुचौ ॥ २१ ॥ इष्टम् ॥ २२ ॥ ऋतुं प्राप्य ॥ २३ ॥ योजनान्न परम् ॥ २४ ॥ भोजनं मधुरं स्निग्धम् ॥ २५ ॥

---

१. This Sūtra is preceded by the stanza : जपादौ नाधिकारोऽस्ति सम्यक्पाठमजानतः। प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये ॥ in S[1] S[2] S[3] W K B B[1] B[2].

२. स्यादा–W.

३. सङ्करोपहितः B (ग, घ).

४. Instead of this Sūtra W and S[3] respectively read ओम् and ॐ.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्णदोषविवेकार्थम् ॥ २६ ॥ तिङ्क्तद्धितचतुष्टयसमासाः शब्दमयम् ॥ २७ ॥ तां वाचमोंकारं पृच्छामः ॥ २८ ॥ अथ शिक्षा विहिताः ॥ २९ ॥ सवनक्रमेणोरःकण्ठभ्रूमध्यानि ॥ ३० ॥ आयाममार्दवाभिघाताः ॥ ३१ ॥ उच्चनीचविशेषः ॥ ३२ ॥ अथाख्याः समाम्नायाधिकाः प्राग्रिफितात् ॥ ३३ ॥ उपदिष्टा वर्णाः ॥ ३४ ॥ अन्त्याद्वर्णात् पूर्व उपधा ॥ ३५ ॥ निर्देश इतिना ॥ ३६ ॥ कारेण च ॥ ३७ ॥ अव्यवहितेन व्यञ्जनस्य ॥ ३८ ॥ र एफेन च ॥ ३९ ॥ स्वरैरपि ॥ ४० ॥[1] २ ॥

नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः ॥ ४१ ॥ दन्त्यस्य मूर्द्धन्यापत्तिर्नतिः ॥ ४२ ॥ समानस्थानकरणास्यप्रयत्नः सवर्णः ॥ ४३ ॥ सिमादितोऽष्टौ स्वराणाम् ॥ ४४ ॥ सन्ध्यक्षरं परम् ॥ ४५ ॥ अकण्ठ्यो भावी ॥ ४६ ॥ व्यञ्जनं कादि ॥ ४७ ॥ अनन्तरं संयोगः ॥ ४८ ॥ स्पर्शेष्वेव संख्या ॥ ४९ ॥ द्वौ द्वौ प्रथमौ जित् ॥ ५० ॥ ऊष्माणश्च हवर्जम् ॥ ५१ ॥ मुच ॥ ५२ ॥ धि शेषः ॥ ५३ ॥ द्वितीयचतुर्थाः सोष्माणः ॥ ५४ ॥ अमात्रस्वरो ह्रस्वः ॥ ५५ ॥ मात्रा च ॥ ५६ ॥ द्विस्तावान् दीर्घः ॥ ५७ ॥ प्लुतस्त्रिः ॥ ५८ ॥ व्यञ्जनमर्धमात्रा ॥ ५९ ॥ तदर्धमणु ॥ ६० ॥ ३ ॥

परमाण्वर्धाणुमात्रा ॥ ६१ ॥ स्थाने ॥ ६२ ॥ हस्तग्रहणे दीर्घप्लुतौ प्रतीयात् ॥ ६३ ॥ प्रथमग्रहणे वर्गम् ॥ ६४ ॥

---

१. S[1] K B B[1] B[2] ; the Sūtra स्वरैरपि precedes र एफेन च in S[2] S[3] W.

२. ह– K B B[1] ; हि– corrected to ह– in S[3] ; हि– B[2] S[1] S[2] W.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॠऌ ᳲकौ[1] जिह्वामूले ॥ ६५ ॥ इचुशेयास्तालौ[2] ॥ ६६ ॥ षटौ मूर्धनि ॥ ६७ ॥ रो दन्तमूले ॥ ६८ ॥ लुलसिता दन्ते ॥ ६९ ॥ उवोᳲपूपा[3] ओष्ठे ॥ ७० ॥ अहविसर्जनीयाः कण्ठे ॥ ७१ ॥ सवर्णवच्च ॥ ७२ ॥ ऐकारौकारयोः कण्ठ्या पूर्वा मात्रा तालव्योष्ठ्योरुत्तरा ॥ ७३ ॥ यमानुस्वारनासिक्यानां नासिके ॥ ७४ ॥ मुखनासिकाकरणोऽनुनासिकः ॥ ७५ ॥ दन्त्या जिह्वाग्रकरणाः ॥ ७६ ॥ रश्च ॥ ७७ ॥ मूर्द्धन्याः प्रतिवेष्ट्याग्रम् ॥ ७८ ॥ तालुस्थाना मध्येन ॥ ७९ ॥ समानस्थानकरणा नासिक्यौष्ठ्याः ॥ ८० ॥ ४ ॥

वो दन्ताग्रैः ॥ ८१ ॥ नासिकामूलेन यमाः ॥ ८२ ॥ जिह्वामूलीयानुस्वारा हनुमूलेन ॥ ८३ ॥ कण्ठ्या मध्येन ॥ ८४ ॥ प्रथमोत्तमाः पदान्तीया अचञौ[4] ॥ ८५ ॥ विसर्जनीयः ॥ ८६ ॥ स्वराश्च लकारवर्जम् ॥ ८७ ॥ णकारर्कारावग्रहे ॥ ८८ ॥ अनुनासिकाश्चोत्तमाः ॥ ८९ ॥ स्पर्शान्तस्य स्थानकरणविमोक्षः ॥ ९० ॥ अवसाने च ॥ ९१ ॥ प्रगृह्यम् ॥ ९२ ॥ एकारेकारोकारा द्विवचनान्ताः ॥ ९३ ॥ ओकारश्च पदान्तेऽनवग्रहः ॥ ९४ ॥ उकारोऽपृक्तः ॥ ९५ ॥ चमू अस्मे त्वे ॥ ९६ ॥ मे उदात्तम् ॥ ९७ ॥ अमी पदम् ॥ ९८ ॥ स्वरोऽक्षरम् ॥ ९९ ॥ सहाद्यैर्व्यञ्जनैः ॥ १०० ॥ ५ ॥

---

१. ᳲकौ K B S^3 ; ᳲक्कौ B^1 B^2 W ; ᳲकौ S^1 S^2.

२. –चु– S^3.

३. उवोᳲपूपा B^1 B^2 W ; उवोᳲपा S^1 ; उवोपोपध्मा K B S^3 ; उवौपोपध्मा S^2.

४. अचञौ S^1 S^2 S^3 W B^1 B^2 ; अच् ञौ K B.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्तरैश्चावसितैः ॥ १०१ ॥ संयोगादिः पूर्वस्य ॥ १०२ ॥ यमश्च ॥ १०३ ॥ क्रमजं च ॥ १०४ ॥ तस्माच्चोत्तरं स्पर्शे ॥ १०५ ॥ अवसितं च ॥ १०६ ॥ व्यञ्जनं स्वरेण सस्वरम् ॥ १०७ ॥ उच्चैरुदात्तः ॥ १०८ ॥ नीचैरनुदात्तः ॥ १०९ ॥ उभयवान् स्वरितः ॥ ११० ॥ एकपदे नीच[1]पूर्वः सयवो जात्यः ॥ १११ ॥ उदात्तादयः परे सप्त ॥ ११२ ॥ त्रयो नीच[2]स्वरपराः ॥ ११३ ॥ एदोद्भ्यामकारो लुग[3]भिनिहितः ॥ ११४ ॥ युवर्णौ यवौ क्षैप्रः ॥ ११५ ॥ इवर्ण उभयतोह्रस्वः प्रश्लिष्टः ॥ ११६ ॥ स्वरो व्यञ्जनयुतस्तैरोव्यञ्जनः ॥ ११७ ॥ उदवग्रहस्तैरोविरामः ॥ ११८ ॥ विवृत्तिलक्षणः पादवृत्तः ॥ ११९ ॥ उदा[4]द्यन्तो न्यवग्रहस्ताथाभाव्यः ॥ १२० ॥ ६ ॥

हस्तेन ते ॥ १२१ ॥ चत्वारस्तिर्यक् स्वरिताः ॥ १२२ ॥ अनुदात्तं चेत्पूर्वं तिर्यङ् निहत्य काण्वस्य ॥ १२३ ॥ ऋजुं निहत्य प्रणिहन्यन्त[5] उदात्ते ॥ १२४ ॥ तीक्ष्णोऽभिनिहितः परम्परं मृदुस्त्वन्यः ॥ १२५ ॥ तस्यादित उदात्तं स्वरार्धमात्रम् ॥१२६॥ सप्त[6] ॥ १२७॥ त्रीन् ॥ १२८ ॥ द्वौ ॥ १२९॥ एकम्

---

१. नीच– S^3 W K B B^1 ; नि–S^1 S^2 ; B^2 corrects नीच– to नि– in a later hand.

२. नीच– S^3 W K B B^1 ; नि–S^1 S^2 ; B^2 writes नीच–, but also corrects it to नि– on the margin in a later hand.

३. लुग् S^2 S^3 K B ; S^1 corrects लुब् to लुग् ; लुब् W B^1 (B^1 reads लुव्) B^2.

४. उदात्ता– B (घ) ; उदात्ता– corrected to उदा– in S^3.

५. –हन्यन्त S^1 S^2 S^3 W B^2 ; हन्यत K B B^1.

६. सप्त S^1 S^2 S^3 K B B^1 ; सप्त सामसु W ; B^2 corrects सप्त सामसु to सप्त.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ १३० ॥ सामजपन्यूङ्खवर्जम् ॥ १३१ ॥ प्रावचनो वा यजुषि ॥ १३२ ॥ तमिति विकारः ॥ १३३ ॥ तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ १३४ ॥ तस्मादित्युत्तरस्यादेः ॥ १३५ ॥ षष्ठी स्थानेयोगा ॥ १३६ ॥ तेनेत्यागमः ॥ १३७ ॥ अन्तरेण पर्वणी ॥ १३८ ॥ पर एकस्मात् ॥ १३९ ॥ उभयो- र्विकारः ॥ १४० ॥ ७ ॥

वर्णस्यादर्शनं लोपः ॥१४१॥ विकारी यथासन्नम् ॥ १४२ ॥ संख्यातानामनुदेशो[1] यथासंख्यम् ॥ १४३ ॥ सन्निकृष्टविप्र- कृष्टयोः सन्निकृष्टस्य ॥ १४४ ॥ पूर्वोत्तरयोरुत्तरस्य ॥ १४५ ॥ द्विरुक्तमाम्रेडितं पदम् ॥ १४६ ॥ संहितं स्थितोपस्थितम् ॥ १४७ ॥ संहितावदवग्रहः स्वरविधौ परं च सर्वं चेदनुदात्तम् ॥ १४८ ॥ इतिपरस्तिर्यङ्नीचोऽन्तोदात्ते मध्योदात्ते पर्वणि काण्वस्य वा ॥ १४९ ॥ उदात्तमयोऽन्यत्र नीच एव ॥ १५० ॥ एकवर्णः[2] पदमपृक्तम् ॥ १५१ ॥ स एवादिरन्तश्च ॥ १५२ ॥ अवग्रहः पदान्तवत् ॥ १५३ ॥ न त्वितिकरणम्[3] ॥ १५४ ॥ पूर्वेणोत्तरः संहितः[4] ॥ १५५ ॥ पदविच्छेदोऽसंहितः ॥ १५६ ॥ एवपदद्विपदत्रिपदचतुष्पदानेकपदाः पादाः ॥ १५७ ॥ वर्णाना- मेकप्राणयोगः संहिता ॥ १५८ ॥ विप्रतिषेध उत्तरं बलवदलोपे ॥ १५९ ॥ विसर्जनीयो रिफितः ॥ १६० ॥ ८ ॥

---

१. अनूदेशो K B.

२. एकवर्णः K B ; एकवर्ण W S¹ S² S³.

३. –करणः S¹.

४. –हिता S³.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करनुदात्तम्[1] ॥ १६१ ॥ अन्तरनाद्युदात्तम् ॥ १६२ ॥ अहरभकारपरम् ॥ १६३ ॥ आवर्वरिति समानर्चि ॥ १६४ ॥ स्तोतर्वस्तः सनुतरभार्वाद्वाः[2] ॥ १६५ ॥ स्वः पदमनरणे ॥ १६६ ॥ पदादिश्चाजित्परः ॥ १६७ ॥ द्वाः सवितः पुनस्त्वष्ट-नेष्टरकर्होतर्मातः प्रातर्जामातरजीगः प्रणेतरिति च[3] ॥ १६८ ॥ वृद्धं वृद्धिः ॥ १६९ ॥ ९ ॥

॥ इति कात्यायनप्रातिशाख्यसूत्रे प्रथमोऽध्यायः ॥

---

१. करनु- W S[1] S[2] S[3] ; करमनु- K B.

२. द्वा (for द्वाः) K.

३. च omitted in B[1].

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीयोऽध्यायः

स्वरितवर्जमेकोदात्तं पदम् ॥ १ ॥ अनुदात्तम् ॥ २ ॥ नो नौ मे मदर्थे त्रिद्व्येकेषु ॥ ३ ॥ मा च ॥ ४ ॥ वो वान्ते त्वदर्थे ॥ ५ ॥ त्वा च ॥ ६ ॥ पूर्ववाननुदेशः ॥ ७ ॥ असि ॥ ८ ॥ यथा गृभोसुवोऽग्निभ्यः ॥ ९ ॥ गिर्वणः ॥ १० ॥ अग्ने घृतेनेति च ॥ ११ ॥ प्रचिकितश्च ॥ १२ ॥ एनोऽपापे ॥ १३ ॥ इहपूर्वं श्रुतम् ॥ १४ ॥ मन्ये पदपूर्वं सर्वत्र ॥ १५ ॥ वा च कम्रु चित्समस्माद् घ ह स्म त्व ईम्मर्या अरे स्विन्निपाताश्चेत् ॥ १६ ॥ पदपूर्वमामन्त्रितमनानार्थेऽपादादौ ॥ १७ ॥ तेनानन्तरा षष्ठ्येकपदवत् ॥ १८ ॥ न पृथिवि देवयजन्योषध्या देव शूरेः पवित्रपते पवित्रपूतस्यापालपान्नृणां[1] नृपते सोमाग्नेः सोमेन्द्रस्य[2] सोम सुवीर्यस्य सोम विश्वेषां देवानां प्रजापते यस्य यस्य देवाग्ने तवाग्ने वाजस्याग्ने वरुणस्यापो अस्माकम् ॥ १९ ॥ सुमङ्गल सत्यराजन्विकिरिद्र विलोहित दरिद्र नीललोहित श्रेयस्कर भूयस्कराम्बे अम्बिकेऽम्बालिके शरव्ये ब्रह्मसंशिते मरुतो अश्विना यव्ये गव्ये द्यावापृथिवी उरो अग्ना३इ[3] पत्नीवँल्लाजी३न्छाची३न्मीढुष्टम शिवतम सहस्राक्ष शतेषुधे वसुपते वसुदावन् ॥ २० ॥ १ ॥

---

१. नृपान् (for नृणां) K.

२. सोमेन्द्रस्य omitted in S[1].

३. अग्नाई S[1].

४. पत्नीवल्ला– S[1].

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इडोत्तराणि नव स्वानोत्तराणि षडग्न्युत्तराणि चत्वारि भगोत्तराणि चेन्द्रोत्तरमेकं सिनीवाल्युत्तरं च प्रजापतये ब्रह्मन्निति च ॥ २१ ॥ भूतिराद्युदात्तम् ॥ २२ ॥ कदा न-रिष्येम-पूर्वस् ॥ २३ ॥ आमन्त्रितं च ॥ २४ ॥ कृष्णो मृगसंयोगे ॥ २५ ॥ व्ययवाँश्चान्तः ॥ २६ ॥ परः प्रधाने ॥ २७ ॥ मात्रा च परिमाणे ॥ २८ ॥ दक्षिणा च ॥ २९ ॥ न दश-विश्वकर्मा-निषद्येन्द्रस्य-पातु-सदः-सद्भ्येषु[१] ॥ ३० ॥ कर्णः[२] स्वाङ्गे[३] ॥ ३१ ॥ महो नपुंसके ॥ ३२ ॥ अवश्च ॥ ३३ ॥ अन्धो वीर्ये ॥ ३४ ॥ एता वर्णे ॥ ३५ ॥ रोहितश्च केवलः ॥ ३६ ॥ यन्त्री राट् ॥ ३७ ॥ ओषधीरनामन्त्रिते ॥ ३८ ॥ सर्व विश्व[४] मानुपाशाः स्वाहा वाजः पयो नमः ॥ ३९ ॥ असि शिवा सुपदा पयस्वती यत्ते मधुमतीर्वर्चस्वानोजिष्ठो भ्राजिष्ठः[५] शुष्मिणी भद्रवाच्याय वन्द्यो[६] मेध्यो[७] यम आदित्यस्त्रितः[८] सोमेन स्वसेत्येतेषु ॥ ४० ॥ २ ॥

धनदारत्नधाम्यां च ॥ ४१ ॥ रायोऽपोषे ॥ ४२ ॥ न भागमीशिषयोः ॥ ४३ ॥ त्रिधा बद्धहितयोः ॥ ४४ ॥ सुकृतं

---

१. सदसद्भ्योषु B[1].

२. कर्ण W.

३. स्वांगः B[1].

४. सर्वे विश्वं B[1].

५. ओजिष्ट भ्राजिष्ट B[1] ; B[2] corrects ओजिष्ट भ्राजिष्ट to ओजिष्ठो भ्राजिष्ठः.

६. वन्द्यो S[1] S[2] S[3] W B ; वन्द्या K ; वन्द्य B[1] ; वन्द्य corrected to वन्द्यो in B[2].

७. मेध्य B[1] ; मेध्य corrected to मेध्यो in B[2].

८. यम आ– S[2] S[3] W ; यमु आ– S[1] ; यमा– K B B[1] ; यमा– corrected to यम आ– in B[2].

९. –त्यत्रितः B[1] ; –त्यत्रितः corrected to –त्यस्त्रितः in B[2].

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूते ॥ ४५ ॥ द्विरुदात्तानि ॥ ४६ ॥ बृहस्पतिर्वनस्पतिर्नराशंसस्तनूनप्त्रे तनूनपान्नक्तोषासोषासानक्ता द्यावापृथिवी द्यावाक्षामा क्रतूदक्षाभ्यामेतवा अन्वेतवा इति च ॥ ४७ ॥ देवताद्वन्द्वानि चानामन्त्रितानि[१] ॥ ४८ ॥

इन्द्राबृहस्पतिभ्यामिन्द्राबृहस्पती इति त्रीणि ॥ ४९ ॥ सर्वमग्ना३इ लाजी३ञ्छाची३निति त्रिमात्राणि च ॥ ५० ॥ प्रणवश्च ॥ ५१ ॥ विवेशा३ इति चानुदात्तम् ॥ ५२ ॥ आसी३दिति चोत्तरं विचारे ॥ ५३ ॥ पूर्वमन्तोदात्तम् ॥ ५४ ॥ द्वन्द्वं चेन्द्रसोमपूर्वं पूषाग्निवायुषु ॥ ५५ ॥ अग्निश्चेन्द्रे ॥ ५६ ॥ ऋक्सान्नि च ॥ ५७ ॥ यतो गतौ ॥ ५८ ॥ पायोर्विशः ॥ ५९ ॥ आयुर्यमोर्वश्यस्तिभ्यः ॥ ६० ॥ ३ ॥

अस्य रोचनासौ-बोधा मे-पारं-पुर एतारो-दिवः-कोऽहं-त्वंमहीं-य ईश-ईशानेभ्यः ॥ ६१ ॥ प्रत्नां-यज्ञस्य-हविषः-पाहीत्पातंमध्वो-यजमानस्य-होतुरजरासो-लोकेषु च[२] ॥ ६२ ॥ अनुदात्तमन्यत् ॥ ६३ ॥ पक्तोर्हसयोरन्त उदात्त[४] आदिर्वा ॥ ६४ ॥ वृद्धं वृद्धिः ॥ ६५ ॥ ४ ॥

॥ इति कात्यायन-प्रातिशाख्यसूत्रे द्वितीयोऽध्यायः ॥

---

१. –न्यनामंत्रितानि च (for –नि चानामन्त्रितानि) S^1.

२. B^1 B^2 K B ; च omitted in S^1 S^2 S^3 W.

३. च omitted in W.

४. उदात्त S^1 S^2 S^3 W B^1 B^2 ; उदात्तं K B.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयोऽध्यायः

संहितायाम् ॥ १ ॥ अर्थः पदम् ॥ २ ॥ पदान्तपदाद्योः सन्धिः ॥ ३ ॥ न परकालः पूर्वकाले पुनः ॥ ४ ॥ ह्यन्तराः कालाः ॥ ५ ॥ विसर्जनीयः ॥ ६ ॥ चछयोः शम् ॥ ७ ॥ तथयोः सम् ॥ ८ ॥ प्रत्ययसवर्णं मुदि शाकटायनः ॥ ९ ॥ अविकारं शाकल्यः शपसेषु ॥ १० ॥ प्रकृत्या कखयोः पफयोश्च ॥ ११ ॥ जिह्वामूलीयोपध्मानीयौ शाकटायनः ॥ १२ ॥ लुङ्[1] मुदि जित्परे ॥ १३ ॥ उपवसने पीवः ॥ १४ ॥ स ओषधीमयोः ॥ १५ ॥ व्यञ्जने च ॥ १६ ॥ स्य एष च ॥ १७ ॥ निश० ो बहुलम् ॥ १८ ॥ अनितावध्याये ॥ १९ ॥ इति-वच्चर्चायाम् ॥ २० ॥ १ ॥

ककारपकारयोः सकारम् ॥ २१ ॥ भाव्युपधः षकारम् ॥ २२ ॥ आविर्निरिड[2] इडाया वसतिर्वरिवः ॥ २३ ॥ दिवोऽ[3]-ककुत्पृथिव्योः ॥ २४ ॥ रायः सहसः पोषपुत्रयोः ॥ २५ ॥ तमसोऽपरस्तात् ॥ २६ ॥ तपसस्पृथिव्याम् ॥ २७ ॥ अध्वनो रजसो रिषः स्पृशस्पातौ ॥ २८ ॥ अध्वनस्कुर्विति च ॥ २९ ॥ समानपदे च ॥ ३० ॥ परावसाने ॥ ३१ ॥ कविः[4] करत्कृधिषु ॥ ३२ ॥ कृपीश्च कृधौ सकारम् ॥ ३३ ॥ सदो द्यौर्नमस्कृतं-

---

१. लुङ् K B S[1] S[2] S[3] W ; लुप् B[1] ; लुस् B[2].

२. अवि– K B.

३. दिवोः S[1].

४. कविष् K B S[2] B[2].

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पितापथेषु ॥ ३४ ॥ पति तालव्यस्वरोदये ॥ ३५ ॥ पदे च ॥ ३६ ॥ न परुषः परुषि ॥ ३७ ॥ वाजपतिर्वास एदिधिषुरन्तः-पर्शव्येनान्तःपार्श्वयमिति च ॥ ३८ ॥ अहर्पतौ[1] रेफम् ॥ ३९ ॥ परश्च मूर्धन्यम् ॥ ४० ॥ २ ॥

स्वर्धूः सांसहयोः ॥ ४१ ॥ उकारं दुर्दे ॥ ४२ ॥ नाशे च ॥ ४३ ॥ पुरो दाशे ॥ ४४ ॥ अनसो वाहौ सकारो डकारम् ॥ ४५ ॥ ओ[2]कारमितः सिश्वतौ सोपधः ॥ ४६ ॥ षड् दशदन्तयोः संख्यावयोऽर्थयोश्च[3] ॥ ४७ ॥ त आघादनाडम्बरात् ॥ ४८ ॥ वनसदो[4]ऽवेटो रेफेण ॥ ४९ ॥ पत्यौ[5] च सकारेण ॥ ५० ॥ ऋतावरौ च पतिपरयोः ॥ ५१ ॥ तद्बृहतौ करपत्योस्तलोपश्च ॥ ५२ ॥ परि कृते षकारेण ॥ ५३ ॥ चन्द्रे सु शकारेण ॥ ५४ ॥ दुधुक्षन्धो दकारम् ॥ ५५ ॥ भाविभ्यः सः[6] षं समानपदे ॥ ५६ ॥ अनुस्वाराच्च तत्पूर्वात् ॥ ५७ ॥ करेफाभ्यां च ॥ ५८ ॥ नेः सीदतेः ॥ ५९ ॥ ससाद च[7] ॥ ६० ॥ ३ ॥

---

१. अहर्पतौ W B[1] B[2] ; अहः पतौ K B S[1] S[2] S[3].

२. S[1] S[2] S[3] W B[1] B[2] ; उ– K B.

३. –वयोऽर्थयोश्च W S[2] B[2] K B; –वयवयोर्थयोश्च S[1] ; –वयवार्थयोश्च S[3] ; –वयोर्थयोश्च योश्च B[1].

४. वन सदे W ; वनसदो the rest.

५. S[1] S[2] S[3] K B ; पतौ W B[1] B[2].

६. सु S[1] B[2].

७. S[1] S[2] S[3] K B ; ससाद च omitted as a Sūtra in W B[1] ; supplied on the margin in B[2].

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ओकारात्सु ॥ ६१ ॥ ओश्चा[1] पृक्तात् ॥ ६२ ॥ अभेश्च ॥ ६३ ॥ परेः[2] सिश्वतेः[3] ॥ ६४ ॥ अभेश्च[4] ॥ ६५ ॥ अव्यवहितोऽपि[5] ॥ ६६ ॥ वेर्युदयः ॥ ६७ ॥ हेर्मिथोदयः ॥ ६८ ॥ द्यवेश्च ॥ ६९ ॥ नेः स्त्यास्तनोः[6] ॥ ७० ॥ ततक्षौ ॥ ७१ ॥ अनोः स्तुवन्त्याम्[7] ॥ ७२ ॥ दुःष्वप्न्यम्[8] ॥ ७३ ॥ वन्दारुर्माकिः ॥ ७४ ॥ सहेः पृतनायाः ॥ ७५ ॥ सधिरंशुरदितिः ॥ ७६ ॥ वायुरग्निरग्नेरेकाक्षरे[9] ॥ ७७ ॥ सकारपरे च ॥ ७८ ॥ मातृभिरर्चिभिः पायुभिर्वरूत्रीः ॥ ७९ ॥ पात्तथौ मूर्धन्यम् ॥ ८० ॥ ४ ॥

प्रकृत्या नानापदस्थे तकारे ॥ ८१ ॥ अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसंदृशमभिसस्त्वाभिसंविशन्तु सुसस्या अतिस्थूलं मुसले पत्नीसंयाजान् क्रतुस्थलाञ्जिसक्थो[10] दिविस्पृशा हृदिस्पृशं हिंसीर्ऋक्सामयोर्ऋक्सामाभ्यां तित्तिरिः सोसेन सीसाः सीसं पशुसनि गोसनिः[11] प्रतिसदृङ् प्रतिसदृक्षा-

---

१. W ; ऊश्चा– the rest.

२. परेश्च K B.

३. सिश्वतेः omitted in W.

४. अभेः S², B (ग, घ).

५. अव्यवेतोऽपि W B².

६. स्त्यायस्तन्योः B¹ B² ; स्त्यास्तन्योः B (ख).

७. स्तुवत्यां B¹.

८. दु– K ; दुष्– B.

९. –क्षरेण B¹.

१०. –सक्थौ S¹.

११. –सनि K B B¹.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सश्चतुस्त्रिंशत् ॥ ८२ ॥ ऋकाररेफारुदयः[1] ॥ ८३ ॥ पृथिवि-दिव्युपरिचर्षणिशकुनियासिभ्यः ॥ ८४ ॥ ऋषरेभ्यो नकारो णकारं समानपदे ॥ ८५ ॥ स्वरयवहकपैश्च ॥ ८६ ॥ निषण्णाय रथवाहणमिन्द्र एणं परिणीयते समिन्द्र ण उरुष्या णो रक्षा णः षू णः षु णः[2] षु णासत्या स्वर्णास्थूरि णौ प्र ण आयूंषि ॥ ८७ ॥ परि ण इति शाकटायनः ॥ ८८ ॥ प्र नेतिनुदति[3]-हिनोमीनाम् ॥ ८९ ॥ प्रकृत्या पदान्तीयः[4] ॥ ९० ॥ नि वनि नसः प्रपीनम्[5] ॥ ९१ ॥ श्रीमना इत्येके ॥ ९२ ॥ इन्द्राग्नी चित्रभानो वार्त्रघ्नं दुःष्वप्न्यं ध्रुवयोनिः पुरोऽनुवाक्याभिः पुरोऽनु-वाक्याश्चर्मस्नम् ॥ ९३ ॥ तवर्गे च ॥ ९४ ॥ पादनन्तर ऋकारे ॥ ९५ ॥ शिलिसिवर्गमध्यमव्यवहितो[6]ऽपि ॥ ९६ ॥ दीर्घम् ॥ ९७ ॥ अश्व रश्मि मति सुमति श्व सुत चारय घृणि सेदि-मेन्द्रिय धारय चित्र भङ्गुर वयुनाश्वस्य हृदय घुष्यर्ताभ्यवताध्यर्चे शक्ति पुरु शचि[7] वकारे ॥ ९८ ॥ नाश्वद्धिरण्यात्[8] ॥ ९९ ॥ अभि विख्येषंवीरं[9]विश्ववत्सवृत्रवाजयन्तेषु ॥ १०० ॥ ५ ॥

---

१. –रुदयश्च K B.

२. षु णः षू णः S^1 S^3 (for षू णः षु णः).

३. –नुदति– W B^1 ; –तुदति–S^1 ; –नुदाति– S^2 S^3 K B ; –नुदति– corrected to –नुदाति– in B^2.

४. पदान्तः corrected to पदान्तीयः in B^2.

५. प्रपीनाम् W.

६. –व्यवेतो B^1.

७. शची S^3 B^1 ; शची corrected to शचि in B^2.

८. –रण्यवत्परम् B^1.

९. –वीर– omitted in W (in the Sūtra only, not in the Comm.)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अश्वस्य वाजिन इति च ॥ १०१ ॥ विश्व सहभुवपुषवलुषु ॥ १०२ ॥ नरहामित्रेषु च ॥ १०३ ॥ तिष्ठाद्युदात्तम् ॥ १०४ ॥ न्न वर्ण[1]भृङ्गयासेषु[2] ॥ १०५ ॥ नि वारहारयोरनवग्रहे ॥ १०६ ॥ नाव नयामि ॥ १०७ ॥ धारयाम योजाव सचस्व नुद मो षु जयतोरुष्य रक्ष यज यच्छ मत्सथ पिप्रत गायता तु येन[3] नकारे ॥ १०८ ॥ भव च ॥ १०९ ॥ सचावरुध्यवाजस्य-पायुषु च ॥ ११० ॥ अपृक्तः सौ ॥ १११ ॥ रथि तकार-नकारयोः ॥ ११२ ॥ अथोदारिथ[4] शोच पनय सादयजु वृष शत्रु सलक्ष्म घाघा[5]रात्यृत भवत[6] यकारे ॥ ११३ ॥ व वृधवृजोः ॥ ११४ ॥ अद्य तंहकारचकारभवतवृणीमहेदेवेषु ॥ ११५ ॥ न होतरि ॥ ११६ ॥ शृणुतत्विपिप्रजिभवतपिबेतस्मतिष्ठरक्षा[7] मकारे ॥ ११७ ॥ विश्वदेव्यसोमौ वत्याम् ॥ ११८ ॥ उप महोभिर्नक्तेमीकारैकारौकारनकारेभ्यः ॥ ११९ ॥ पूरुषो[8]ऽ-वसाने ॥ १२० ॥ ६ ॥

पूष्णोजहीमस्ते[9]ष्वत्र ॥ १२१ ॥ नरस्सप्तऋषीन्नस्त-आहुर्नियुद्भिष्षु[10] यत्र ॥ १२२ ॥ अभिमातिपृतनासुसपत्नधूर्विश्व-

---

१. वन– B^1.

२. –योः corrected to –यासेषु in B^2.

३. येना B^2.

४. अथोदारिथ S^1 S^2 S^3 W K B ; अथभवतोदारिथ B^1 B^2.

५. सलक्ष्म घाघा– S^1 S^2 S^3 B^2 ; सलक्ष्मा घाघा– W B^1 K B.

६. –त्यृत भवत S^2 W K B ; –त्यृत भवता S^1 S^3 ; –त्यृता B^1 B^2.

७. रक्ष S^1 S^3.

८. पूरुषा–W.

९. –जहीमते– B^1 B^2.

१०. –द्भिष्षु K B ; –द्भिःषु S^2 S^3 ; –द्भिषु S^1 W B^1 B^2.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समत्सुपृतनाव्रातेभ्यः सहेः ॥ १२३ ॥ उक्थाच्च शसेः[1] ॥ १२४ ॥ एवाच्छ चक्रमाथ[2] ॥ १२५ ॥ विभ्रासौत्रामण्याम् ॥ १२६ ॥ अधायत्समग्नावायुषु ॥ १२७ ॥ पूर्वो द्वन्द्वेष्ववायुषु[3] ॥ १२८ ॥ हरिश्रयेत्येके ॥ १२९ ॥ पिबा सोमं पिबा सुतस्य स्था मयोभुवो नू रणे शमीष्व मामहानो मामहन्तामशीतम रीरिषो रीरिषत यामयन्ति हि ष्मा ते वर्धया रयिं श्रुधी हवं चरा सोम सूयवसिनी श्रोता ग्रावाणो धर्ता मानुषः पाथा दिवो युक्ष्वा हि गमया तमः सिञ्चता सुतं परीवाप उक्थाशस्त्राण्यत्ता हवींष्याच्या जानु क्षामा रेरिहत् क्षामा भिन्दन्तो रुहेमा स्वस्तये जनयथा च धारया मयि तरा[4] मृधो बोधा मे विचृता[5] बन्धमवता हवेषु शृणुधी गिरो रक्षा तोकं[6] चर्षणीसहां चर्षणी-धृतो येना समत्सु वनेमा त ऋध्यामा ते शिक्षा सखिभ्यस्तत्रा रथं दीया रथेनेता जयत[7] वर्धया त्वं प्रव्रवामा घृतस्याजगन्था परस्या ररिमा हि पुरीतता प्लीहाकर्णशुण्ठाकर्णौ ।[8] प्रकृतिदीर्घा-

---

१. उक्थाच्छसेः B[1].

२. –थाः W.

३. –वायुषु B[1] B[1] K B ; –वायौ S[1] S[2] S[3] W.

४. धारयाम पितरा K B.

५. विचृता S[1] S[2] S[3] K B ; चृता W B[1] ; चृता corrected to विचृता in B[2].

६. त्वं (for तोकं) W.

७. रथेनेता जयत S[2] W B[2] K B ; रथेनेता जयता S[1] ; रथेन प्रेता जयत B[1] S[3].

८. प्लीहाकर्णशुण्ठाकर्णौ S[1] S[2] S[3] K B; प्लीहाकर्णः शुण्ठाकर्णः W B[1] B[2] (शुण्ठाकर्णो B[1], शुण्ठाकर्णौ B[2]).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वित्येके[१] । नीकाशा अनूकाशेन[२] चक्रा जरसं[३] मिथू कस्तरता सखायः सासह्वानपामार्गोभयादत ऋतीषहमभी पुं[४] सुष्टरीमा जुषाणा[५] यजा देवान् येना पावकाश्वायन्तो यदी सरमा स्वदया सुजिह्व निषद्या दधिष्व सदतना रणिष्टन भरा चिकित्वां-श्चिकित्सा[६] गविष्टावबादददृक्षा[७] चायुनक्[८] सृजा रराणः सादन्य-मिति च ॥ १३० ॥ अनुनासिकमुपधा प्रागन्तस्थायाः ॥ १३१ ॥[९] स्वर औपशिविः[१०] ॥ १३२ ॥ अनुस्वारेण व्यञ्जने ॥ १३३ ॥ नुः ॥ १३४ ॥ चछयोः शम् ॥ १३५ ॥ तथयोः सम् ॥ १३६ ॥ दधन्वान् स्ववान् यकारे लोपम् ॥ १३७ ॥ रयिवृधे च[११] ॥ १३८ ॥ नपुंसकादिकारस्य ॥ १३९ ॥ न सप्तम्यामन्त्रितयोः ॥ १४० ॥ ७ ॥

नॄन् पकारे विसर्जनीयम् ॥ १४१ ॥ शत्रून् परिधीन् क्रतून् वनस्पतीन् स्वरे रेफम् ॥ १४२ ॥ आकारोपधो यकारम् ॥ १४३ ॥ न तमे ॥ १४४ ॥ निर्जगन्वान् तमसि ॥ १४५ ॥

---

१. प्रकृतिदीर्घावित्येके omitted in B[1], given on the margin in B[2].

२. नू (for अनू-) B[1].

३. यत्रा नो (for चक्रा जरसं) B[1] ; यत्रा नो corrected to चक्रा जरसं in B[2].

४. पुणः S[1].

५. जुषाणो B[1] ; जुषाणो corrected to जुषाणा in B[2].

६. चिकित्वांत्सादया S[3].

७. अवादृद् रत्ता K; अवाददन्नो B[1].

८. चन आयुनक् S[1].

९. नुः added in S[1].

१०. -शिविः S[1] S[2] W B[1] B[2] ; -शविः S[3] K B.

११. -वृधेन B[1].

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धामञ्छत्रूँश्चिकित्वान्[1] त्वं पूषन्नर्वन्निति च ॥ १४६ ॥ अश्वादौ चाध्याये ॥ १४७ ॥ मनुष्यांस्ताँल्लोकानमित्रानुदि ॥ १४८ ॥ आप्नोतीत्योश्च ॥ १४९ ॥ संक्रमे च वैष्णवान् ॥ १५० ॥ गृहानैमि गृहानुपह्वयामहे वर्चस्वानहं मनुष्यानन्तरिक्षमग्निष्वात्तानृतुमतः पयस्वानग्ने तानश्विना पतङ्गानसन्दितः स्वर्गानपां पतिः सपत्नानिन्द्रः[2] सपत्नानिन्द्राग्नी नभस्वानार्द्रदानुर्विद्वानग्नेर्देवानस्त्रेधतानड्वानाशुरथैतानष्टौ विरूपानालभत एतावानस्यायुष्मानग्ने वायव्यानारण्याः प्रविद्वानग्निनानड्वानघोरामौ शत्रूननु यं यातुधानानस्थादस्मानरिष्टेभिरिति[3] ॥ १५१ ॥ वृद्धं वृद्धिः ॥ १५२ ॥ ८ ॥

॥ इति कात्यायनप्रातिशाख्यसूत्रे तृतीयोऽध्यायः ॥

१. –स्वान् W B¹ B² ; –त्वां S¹ ; –त्वाँस् B K S² S³.

२. इन्द्रः W S¹ S² S³ B¹ B² ; इन्द्र B K.

३. –भिरिति B K B¹ B² S³ ; –भिः S² W ; –भि S¹.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ चतुर्थोऽध्यायः

अनुस्वारं रोष्मसु मकारः ॥ १ ॥ नुश्चान्तःपदेऽरेफे[1] ॥ २ ॥ अनुनासिका चोपधा ॥ ३ ॥ लोपं काश्यपशाकटायनौ ॥ ४ ॥ प्रकृत्या सम्राट्साम्राजि ॥ ५ ॥ शं चे पकारादुकारोदयात् ॥६॥ समन्तःपदे कखपफेष्वनूष्मपरेषु ॥ ७ ॥ नुश्चाम्रेडिते ॥ ८ ॥ अन्तःस्थामन्तःस्थास्वनुनासिकां परसं[2]स्थानाम् ॥९॥ हि ॥१०॥ स्पर्शे परपञ्चमम् ॥ ११ ॥ तकारो ले लम् ॥ १२ ॥ नुश्चानुनासिकम् ॥ १३ ॥ ङ्नौ क्ताभ्यां सकारे ॥ १४ ॥ न दाल्भ्यस्य ॥ १५ ॥ रलावृलवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र ॥ १६ ॥ प्रगृह्यं चर्चायामितिना पदेषु ॥ १७ ॥ रिफितं च संहितायामनिरुक्तम् ॥ १८ ॥ पदावृत्तौ चान्तरेण ॥ १९ ॥ क्रमोक्तावृत्तिः पदेषु ॥ २० ॥ १ ॥

सुपदावसानवर्जम् ॥ २१ ॥ अनितावन्तर्विकारागमं प्रागुक्त्वा ॥ २२ ॥ विश्वपतीवेति च ॥ २३ ॥ स्वरश्छकारे चकारेण सर्वत्र ॥ २४ ॥ यस्यातिहाय सहेति न ॥ २५ ॥ विश्वा ऊष्मान्तं परि द्विषस्त्वं त्वां यदजयो[3] विराजत्यनिरा अवीवृधन् परिष्ठाः सुक्षितय आशा ओषधीराभाह्यमीवा हि मायास्तेऽसीत्ये[4] तेषु ॥ २६ ॥ पृथिव्या स्वरान्तं सम्भव[5] शुक्रो मन्थी पृथिवीं परो

---

१. वंशः added to –रेफे in S¹ ; वंशः given as the third Sūtra in B K.

२. –सं– S¹ S³ B¹.

३. यदयो B K ; यदजयो the rest.

४. –ऽसीत्ये–W S¹ S² S³ B¹ B² ; –सी– B K.

५. सम्भवः B K.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देवेभिरित्येतेषु ॥ २७ ॥ च[1] विश्वा वो ब्रह्म विश्वा हरी युक्तास्ते शफानां जजान नु कमित्येतेष्विमा[2] ॥ २८ ॥ हवेमोतेमा च ॥ २९ ॥ विष्णो ते बभूव नासत्या भिषजा न आवोढं या देवा हविषो नो मृडातो नो अच्छ[3] विमुञ्चेत्येतेषु ता ॥ ३० ॥ ता ता च ॥ ३१ ॥ धिष्ण्या वरिवोविदं धिष्ण्या[4] युवमिति च ॥ ३२ ॥ भाव्युपधश्च रिद्विसर्जनीयः ॥ ३३ ॥ रेफे लुप्यते दीर्घं चोपधा ॥ ३४ ॥ रेफं स्वरधौ ॥ ३५ ॥ कण्ठ्यपूर्वो यकार-मरिफितः ॥ ३६ ॥ लोपं धौ[5] ॥३७॥ भूमेश्चाकारेऽपृक्ते ॥३८॥ यकाराकारयोर्जास्पत्ये पदे ॥ ३९ ॥ अलोपो मांस्पचन्याः ॥ ४० ॥ २ ॥

सर्वो अःकार[6] ओकारम् ॥ ४१ ॥ अकारे च ॥ ४२ ॥ एषो ह च[7] ॥ ४३ ॥ स्वो रुहावहश्च रात्र्याम् ॥ ४४ ॥ स्वरे भाव्यन्तःस्थाम् ॥ ४५ ॥ सन्ध्यक्षरमयवायावम् ॥ ४६ ॥ उदात्त-स्यान्तःस्थीभावे स्वरितं[8] परमनुदात्तम्[9] ॥ ४७ ॥ कण्ठ्य ऋकारे ह्रस्वम् ॥ ४८ ॥ अथैकमुत्तरश्च ॥ ४९ ॥ सिं सवर्णे दीर्घम् ॥ ५० ॥ अनुनासिकवत्यनुनासिकम् ॥ ५१ ॥ कण्ठ्यादिवर्णे

---

१. इमा च (for च) W.

२ इत्येतेषु W.

३. अच्छा S¹.

४. धिष्ण्य S¹.

५. लोपो धौ W B¹ ; लोपो धौ corrected to लोपं धौ B².

६. S¹ S³ W B² ; सर्वोअकार B K B¹ ; सर्वोकार S².

७. च omitted in W B².

८. स्वरितं omitted in S³.

९. अनुदात्त° स्वरितं S³.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकारम् ॥ ५२ ॥ उवर्ण ओकारम् ॥ ५३ ॥[1] समुद्रस्येमँस्त्वेमँ-स्त्वोम्नन्निति च ॥ ५४ ॥ एजत्योजोरेकेषाम् ॥ ५५ ॥ संध्यक्षर ऐकारौकारौ ॥ ५६ ॥ वाहौ च स्वरभूते ॥ ५७ ॥ आरमृकारोऽ-पृक्तात् ॥ ५८ ॥ लकारश्चाल्कारम् ॥ ५९ ॥ एदोद्भ्यां पूर्वमकारः ॥ ६० ॥ ३ ॥

तौ चेदुदात्तावनुदात्ते[2] स्वरितौ ॥ ६१ ॥ न द्वेशेऽभवति ॥ ६२ ॥ गाहमानः शिवो भरन्तो द्वेषोभ्यो जम्भयन्तो वाजे वाजजितो मदन्तः शोचेऽवसे सुपुवे ज्योते सुपर्णो वीरुधः सुवीरो धातवे सूनवे द्रूणान आशवो वहतः संक्रन्दनो वाहवोऽयुध्योऽद्रुहः ॥ ६३ ॥ वोऽहं सोऽहं सोऽस्माकं तेऽभिगरो वोऽर्वाची ॥६४॥ येऽन्नात्रयोः ॥ ६५ ॥ अविद्यासम्भूत्योश्च ॥ ६६ ॥ उपस्थेऽन्त-स्तेभ्योऽकरम् ॥ ६७ ॥ नमोऽस्त्वसौत्रामण्याम् ॥ ६८ ॥ विश्वेऽग्रे विशो रायोऽनग्नौ ॥ ६९ ॥ सूर्योऽग्नेऽभौ ॥ ७० ॥ रिषो यवसे पुरुप्रियोऽन्नपतेऽर्णवे ॥ ७१ ॥ व्यपरे च ॥ ७२ ॥ गवे मे मनसो वाजयन्तः सोम्यासः पाशिनो विदानोऽनृते मूजवतो वृष्णे[3]ऽपाको दीदिवस्त्रयस्त्रिंशे ब्रह्मणे यको रथो विश्वतः पादो वसन्तः ॥ ७३ ॥ अवोस्त्वग्ने गृहपतेऽभि सत्वानोऽहं नोऽजस्त्रया विमानोऽजस्रः सुतेऽश्विना नमोऽग्नये तेऽग्रं[4] तेऽग्रे वृक्षस्य प्रथमोऽन्तस्तेऽन्येन ॥ ७४ ॥ पणयो जहीमोऽम्बिके ॥ ७५ ॥ नोनुमोऽदुग्धाइव प्रचेतसोऽश्वान्नरोऽस्माकं वृषपाण-

---

१. Sūtras 52 and 53 read as one Sūtra in W.

२. उदात्ताद्– S^3.

३. वृष्णो B K S^1.

४. तेऽग्रं omitted in B K.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योऽश्वाः प्रदिशोऽनूदिते[1]ऽनागा अन्धसोऽर्चा पनस्यतेऽद्धा यज्ञियेभ्योऽमृतत्वं विपश्चितोऽभि[2] जनोऽनमीव आयवोऽनु[3] नोऽद्य देशेऽभवद् वयुनेऽजनिष्ट विह्ननापसोऽजायन्त पूर्व्यासोऽरेणवो नोऽश्मा नोऽदितिर्नोऽहिः ॥ ७६ ॥ ब्राह्मणः ॥ ७७ ॥ यजुष्षु च ॥ ७८ ॥ संक्रमे च सर्वत्र ॥ ७९ ॥ प्रकृतिभाव ऋक्षु ॥ ८० ॥ ४ ॥

जुषाणश्चानध्वनि ॥ ८१ ॥ ते चानुदात्तमनुदात्ते ॥ ८२ ॥ हेड आपो गुत्रोऽपाश्रे धीरासो देवास उरो रक्षा णो मो वैश्वानरो वृषभो वचः प्राण उदानोऽङ्ग[4] इमा मे वृष्णो दशमास्योऽन्ध आचित्तोऽरिष्टो अर्जुनः प्रत्याश्रावः स्विष्टो घासे प्रणीतस्तेभ्यो नमो अस्तु दूरे नो अद्य यज्ञे सधस्थे सो अध्वरायेन्द्रे हिरण्यपर्णो द्वारो देवोऽब्दो रथिभ्यो महद्भ्यः संसदः ॥ ८३ ॥ छन्दो अङ्कुपमङ्काङ्कमस्त्रोत्रयः ॥ ८४ ॥ का ध्रुवोती सदना होतारा ज्या स्वधा पृथिवी प्रतिमेमसदन्नश्यामाकर्मोर्ध्वमियमवस्तादुतास्तिषु ॥ ८५ ॥ प्रगृह्यं स्वरे ॥ ८६ ॥ न रोदसीमे ॥ ८७ ॥ विश्पतीवो-पस्थिते ॥ ८८ ॥ उकारोऽपृक्तोऽस्पर्शात् ॥ ८९ ॥ प्लुतमितौ ॥ ९० ॥ ओकारश्च ॥ ९१ ॥ उकारोऽपृक्तो दीर्घमनुनासिकम् ॥ ९२ ॥ इतेश्च[5] परं पदं[6] चर्चायाम् ॥ ९३ ॥ तकारवर्गश्चकारवर्गे

---

१. –नु उदिते B[1] B[2].

२. –भिर् K.

३. आयुवोऽनु B K.

४. –नो अंग S[1] S[2]; –नोग्र B[1].

५. एतेश्च K; इत्येश्च B[1].

६. परं पदं B K S[2]; परं पद–S[3]; परपद–S[1]; परमु पदं B[1] B[2]; परमु पद–W.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चकारवर्गम् ॥ ९४ ॥ शकारे च ॥ ९५ ॥ परश्चास्पर्शपरश्छम् ॥ ९६ ॥ उदः स्तभाने लोपम् ॥ ९७ ॥ अश्वात् स्थे[1] तकारं संज्ञायाम् ॥ ९८ ॥ स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र ॥ ९९ ॥ परं तु रेफहकाराभ्याम् ॥ १०० ॥ ५ ॥

ऊष्मान्तःस्थाभ्यश्च स्पर्शः ॥ १०१ ॥ जिह्वामूलीयोपध्मानीयाभ्यां च ॥ १०२ ॥ यैस्तु परं तैर्न पूर्वम् ॥ १०३ ॥ नास्वरपूर्वा ऊष्मान्तःस्थाः ॥ १०४ ॥ विसर्जनीयाद् व्यञ्जनपरः ॥ १०५ ॥[2] ङ्नौ चेद् ह्रस्वपूर्वौ स्वरे पदान्तौ ॥ १०६ ॥ संयोगपूर्वव्यञ्जनान्तावसानगताः स्वरा द्विमात्राः[3] ॥ १०७ ॥ प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः ॥ १०८ ॥ नानुस्वारः ॥ १०९ ॥ सवर्णे ॥ ११० ॥ ऋवर्णे ॥ १११ ॥ लृवर्णे ॥ ११२ ॥ यमे ॥ ११३ ॥ विसर्जनीयः ॥ ११४ ॥ स्ववर्गीये चानुत्तमे ॥११५॥ अवसितं च ॥ ११६ ॥[4] नान्तःपदे स्वरपञ्चमान्तःस्थासु ॥ ११७ ॥ स्पर्शोऽपञ्चमः स्वरधौ तृतीयम् ॥ ११८ ॥ जिति प्रथमम् ॥११९॥ असस्थाने मुदि द्वितीयं शौनकस्य ॥१२०॥६॥

पञ्चमे पञ्चमम् ॥ १२१ ॥ हश्च तस्मात् पूर्वचतुर्थम् ॥ १२२ ॥ नकारपरो जातूकर्ण्यस्य ॥ १२३ ॥ हि ॥ १२४ ॥ यवयोः पदान्तयोः स्वरमध्ये लोपः ॥ १२५ ॥ न वकारस्यासस्थान एकेषाम् ॥ १२६ ॥ असौ च शाकटायनः ॥ १२७ ॥

---

१. अश्वात् स्थे B K W B^1 S^2; अश्वस्थे S^1 S^3 B^2.

२. B K omit विसर्जनीयाद् व्यञ्जनपरः, Though its Comm. is given in both of them.

३. Instead of this Sūtra B^1reads : संयोगवाक्यार्थत्रयं पूर्वव्यंजनं ता अवसानगताः स्वद्विमात्राः ।

४. न द्विरुक्तम् added as an additianal Sūtra in W.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रउगमिति[1] यकारलोपः ॥ १२८ ॥ अनादेशेऽविकारः ॥१२९॥ प्रागुत्वर्णादक्षराणामेकीभावः ॥ १३० ॥ स्वरितवान् स्वरितः ॥ १३१ ॥ उदात्तवानुदात्तः ॥ १३२ ॥ इवर्णमुभयतोह्रस्वमुदात्तपूर्वमनुदात्तपरं स्वरितम् ॥ १३३ ॥ वीक्षितायेति च ॥ १३४ ॥ उदात्ताच्चानुदात्तं स्वरितम् ॥ १३५ ॥ निहितमुदात्तस्वरितपरम् ॥ १३६ ॥ अनवग्रहे[2] ॥ १३७ ॥ स्वरितस्य चोत्तरो देशः प्रणिहन्यते ॥ १३८ ॥ स्वरितात्परमनुदात्तमुदात्तमयम् ॥१३९॥ अनेकमपि ॥ १४० ॥ ७ ॥

नोदात्त[3]स्वरितोदयम् ॥ १४१ ॥ द्विवर्णमेकवर्णवद्धारणात् स्वरमध्ये समानपदे ॥ १४२ ॥ ऐ[4]कारौकारौ च ॥ १४३ ॥ डढौ ळळ्हावेकेषाम् ॥ १४४ ॥ द्विसकारं शासूस्व रासूस्वेति ॥ १४५ ॥ ऋलवर्णे रेफलकारौ संश्लिष्टावश्रुतिधरावेकवर्णौ ॥ १४६ ॥ मात्रार्धमात्राणुमात्रा[5] वर्णोपत्तीनाम् ॥ १४७ ॥ अनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्रा पूर्वा चार्धमात्रा[6] ॥ १४८ ॥ दीर्घादर्धमात्रा पूर्वा चाध्यर्धा ॥ १४९ ॥ द्वियकारम् ॥ १५० ॥ आप्यायय्यमानो यमो रय्यै धाय्यारूपं श्रवाय्यं नृपाय्यं पौरुषेय्या हृदय्याय[7] सह रय्या निचाय्य सान्नाय्यं[8] सन्ताय्येति च

---

१. प्रउगमिति B K B¹ B²; प्रयुगमिति W S¹ S² S³,

२. एके added on the margin in S¹.

३. उदात्त (for नोदात्त-) W.

४. ए-S¹.

५. मात्राणुमात्रा B K.

६. -मात्रेति B K.

७. हृदय्याय W S³; हृदय्या B K S¹ S² B²; हृदयाय B¹.

८. सान्नाय्य B K S¹ B¹ B²; सान्नाय्य omitted in W S²; S³ gives it on the margin.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ १५१ ॥ एकः ॥ १५२ ॥ ज्योतिश्च्यवनः श्येनः श्यामं श्यामाकाः श्येतो ज्येष्ठो ज्योग् ज्या च्छ्यति ॥ १५३ ॥ जुषस्व यविष्ठ्य शोचा यविष्ठ्येति च ॥ १५४ ॥ स्येति[1] ण्यत्वं च ॥ १५५ ॥ स्वरपूर्वाश्च शचजाः समानपदे द्विरुक्ताः ॥ १५६ ॥ व्यञ्जनपराश्च न ॥ १५७ ॥ कश्यपस्यानार्षेये[2] जातूकर्ण्यस्य ॥ १५८ ॥ उच्चैरजुमज्ञानश्च ॥ १५९ ॥ मर्त्तो वुरीत मर्त्तेष्वग्निः परो मर्त्तस्ते मर्त्त इति च ॥ १६० ॥ ८ ॥

अन्तःपदेऽपञ्चमः[3] पञ्चमेषु विच्छेदम् ॥ १६१ ॥ ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोषः ॥ १६२ ॥ स्फोटनं च कवर्गे वा स्पर्शात् ॥ १६३ ॥ स्वरात् स्वरे[4] समानपदे[5] जो यं न तु ऋकारे ॥ १६४ ॥ ख्यातेः खयौ कशौ[6] गार्ग्यः सख्योरव्यमुख्यवर्जम् ॥ १६५ ॥ त्रिपदाद्यावर्तमाने संक्रमः ॥ १६६ ॥ द्विपदैकप-दान्यप्यनुवाके ॥ १६७ ॥ अनन्तरे ॥ १६८ ॥ अपराङ्गे ॥ १६९ ॥ अस्वरविकारे ॥ १७० ॥ अलिङ्गविकारे ॥ १७१ ॥ असमाने ॥ १७२ ॥ त्रिरावृत्ते ॥ १७३ ॥ गूढे ॥ १७४ ॥ पदसमूहे ॥ १७५ ॥ संहितायां च[7] ॥ १७६ ॥ अवसानार्थं पुनर्ग्रहणम् ॥ १७७ ॥ अवि[8]कारार्थं च ॥ १७८ ॥ उत्सर्गश्च ॥ १७९ ॥ क्रमः स्मृतिप्रयोजनः ॥ १८० ॥ ९ ॥

---

१. स्येति B K B^1 B^2; श्येति S^1 S^2 W; श्येति corrected to स्येति S^3.

२. –र्षेयो S^3.

३. Sपञ्चमाः S^1 S^2.

४. स्वरे K B^1 B^2; स्वरे परे B W S^1 S^2 S^3.

५. समानपदे B K W S^1 S^2 S^3; पदे समाने B^1 B^2.

६. कशौ B K B^1 B^2; कसौ W S^1 S^2 S^3.

७. च omitted in B K.

८. अवि–B K S^1 B^1 B^2; अधि–W S^2; अधि–corrected to अवि–S^3.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वे द्वे पदे सन्दधात्युत्तरेणोत्तरमावसानादपृक्तवर्जम् ॥१८१॥ अपृक्तमध्यानि त्रीणि स त्रिक्रमः ॥ १८२ ॥ पुनराकारेणोत्तरम् ॥ १८३ ॥ मोषूणाभीषुणौ च ॥ १८४ ॥ चत्वार्यपृक्तपूर्वे नकारपरे सौ ॥ १८५ ॥ मकारपरे चैके ॥ १८६ ॥ पुनः सुपदेनोत्तरम् ॥ १८७ ॥ पूर्वस्योत्तरसंहितस्य स्थितोपस्थितमवगृह्यस्य ॥ १८८ ॥ सुपदे शाकटायनः ॥ १८९ ॥ अन्तःपददीर्घीभावे ॥ १९० ॥ विनामे ॥ १९१ ॥ प्रगृह्ये ॥ १९२ ॥ रिफितेऽनिरुक्ते ॥ १९३ ॥ अवसाने च ॥ १९४ ॥ यथासमाम्नातं क्रमावसानं संक्रमेषु ॥ १९५ ॥ वृद्धं वृद्धिः ॥ १९६ ॥ ॥ १० ॥

॥ इति कात्यायनप्रातिशाख्यसूत्रे चतुर्थोऽध्यायः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ पञ्चमोऽध्यायः

समासेऽवग्रहो ह्रस्वसमकालः ॥ १ ॥ तरतमयोश्चातिशयेऽदक्षिणप्रत्यासङ्गे ॥ २ ॥ वीतमहूतमसूतमगोपातमरत्नधातमवसुधातमाः पूर्वेण ॥ ३ ॥ सर्वदेवजनेभ्यश्च ॥ ४ ॥ तूणवध्मसूत्तरेण ॥ ५ ॥ रायस्पोषदे विजावेति च ॥ ६ ॥ बहुप्रकृतावागन्तुना पर्वणा ॥ ७ ॥ तद्धति[1] तद्धिते न्यायसंहितं चेत् ॥ ८ ॥ शस्त्वं त्रातातिषु च ॥ ९ ॥ धात्वर्थे यकारे स्वरपूर्वे ॥ १० ॥ वांसौ च भूतकाले स्वरेण ह्रस्वादनुषि ॥ ११ ॥ प्रत्नपूर्वविश्वेमर्तुभ्यस्था ॥ १२ ॥ ह्रस्वव्यञ्जनाभ्यां भकारादौ विभक्तिप्रत्यये ॥ १३ ॥ स्विति[2] चानतौ ॥ १४ ॥ वर्णसङ्ख्येन्यतरतः ॥ १५ ॥ अनुदात्तोपसर्गे चाख्याते ॥ १६ ॥ गिरि त्रशयोः ॥ १७ ॥ इवकाराम्रेडितायनेषु च[3] ॥ १८ ॥ एकात्समीची ॥ १९ ॥ त्वावतः शंयोर्बर्हिर्धास्मयुं मृन्मयीं[4] सुम्नयाशुया साधुया धृष्णुया विशालमनुया ॥ २० ॥ १ ॥

मृगयुमुभयादतोऽपामार्गकिम्पूरुषमिति च ॥ २१ ॥ पारावतानाग्निमारुताश्वेति जातूकर्ण्यस्य ॥ २२ ॥ अधीवासमित्येके ॥ २३ ॥ प्रतिषेधेनानवग्रहः[5] ॥ २४ ॥ उत्तरेण चाकारेण ॥२५॥ द्वापूर्वम् ॥ २६ ॥ संख्यापूर्वश्च धा ॥ २७ ॥ द्वन्द्वानि द्विवच-

---

१. तद्धति omitted in S^1.

